# चतुर्थः पाठः
# ''रायपुरनगरम्''

PT4PUU

इदम् अस्माकं रायपुरनगरम्। खारुन नद्याः तटे रायपुरम् अस्ति। छत्तीसगढप्रदेशस्य राजधानी रायपुरनगरम् अस्ति। अस्य नगरस्य महत्वं प्राचीनकालादेव वर्तते। इयं नगरी तडागानां नगरी इति कथ्यते। अत्र अष्टादशाधिकाः तडागाः सन्ति। अत्र अति प्राचीनः खो खो तडागः,बूढ़ातडागः, (विवेकानन्द सरोवरः) महाराजबन्धः, कंकाली तडागः इत्यादयः ऐतिहासिकं महत्वं द्योतयन्ति। इयम् नगरी छत्तीसगढक्षेत्रस्य संस्कारधानी नगरी इति अभिधीयते।



अत्र दूधाधारी मठः, महामायामंदिरं, कंकालीमंदिरं, जैतुसावमठः, महादेवघट्टः, हटकेश्वर मंदिराणि अतिप्राचीनानि सन्ति। येषां दर्शनमात्रेण हृदि शान्तिः अनुभूयते। दूधाधारीमठस्य निर्माणं १६२० संवत्सरे सञ्जातम्।

अत्र राजनांदगावनाम्नः राज्यस्य महंतघासीदासनरेशेन १८७५ खीस्ततमे निर्मितं प्राचीनतम् अष्टकोणीभवनम् अस्ति। अपि च टाउनहाल इति नाम्नः शताधिकवर्षं प्राचीनभवनम् अस्ति। तथैव राजकुमार महाविद्यालयः, राष्ट्रीय प्रौद्योगिकी संस्थान, रायपुरे च दर्शनीयौ। अत्र रविशंकरःविश्वविद्यालयः, इन्दिरागाँधीकृषिविश्वविद्यालयश्च,स्तः। कुशाभाऊठाकरे पत्रकारिताविश्वविद्यालयः अपि नूतनं स्थापितम्। अत्र एकः संस्कृतमहाविद्यालयः अस्ति। यत्र साहित्य–व्याकरण–दर्शन–वेद ज्योतिष्–कर्मकाण्डश्च विषयाः सन्ति। अत्र छत्तीसगढराज्यशैक्षिकअनुसंधान एवं प्रशिक्षण परिषद्, शिक्षामहाविद्यालयः जिलाशिक्षा एवं प्रशिक्षणसंस्थानश्चापि विद्यन्ते।

घन्टिकाचतुष्पथम् (घड़ी चौक) अस्य नगरस्य प्रसिद्धस्थलमस्ति। नगरस्य विवेकानन्द आश्रमे विवेकानन्दजयन्ती समारोहे विशिष्ट–प्रवचनं प्रतिवर्षं आयोज्यते। आभूषणानां, धान्यानां, वस्त्राणां च रायपुरे असंख्याः आपणाः सन्ति। अत्र लौहोद्योगः प्रसिद्धः। हस्तशिल्पादयः नगरस्य शोभां वर्धयन्ति।



खारुननद्याः तटे प्रतिवर्षं कार्तिक पूर्णिमायां मेलापकः आयोज्यते। इयं स्थली महादेवघाट इति नाम्ना ख्याता। रायपुरवासिनः उत्सवप्रियाः सन्ति। तत्र प्रतिवर्षं दुर्गोत्सवः गणेशोत्सवः ईदः क्रिसमसः इत्यादयः उत्सवाः सोत्साहं सौहार्द्रभावेन समायोज्यन्ते।

अत्रस्थः महन्त घासीदाससंग्रहालयः प्रसिद्धः। अनेकानि क्रीडाकेन्द्राणि सन्ति। यथा सुभाषक्रीडाकेन्द्रः, रविशंकरक्रीडाकेन्द्रः गॉसमेमोरियलः इति क्रीडाङ्गणाः नगरवासीनां क्रीडाप्रेमं दर्शयन्ति।

नगरस्य व्यस्ततमः सर्वेषां प्रियं स्थानं हट्टं च गोलहट्टम् अस्ति। बालकानां मनोरञ्जनाय नन्दनकाननम् अस्ति। यत्र आबालवृद्धाः मनोरञ्जनार्थम् आगच्छन्ति।

## शब्दार्थाः

अस्माकम् = हमारा। इयं नगरी = यह नगरी। छत्तीसगढप्रदेशस्य = छत्तीसगढ़ प्रदेश की। तडागानाम् = तालाबों की। द्योतयन्ति = बतलाते हैं, सूचित करते हैं। अभिधीयते = कहा जाता है। अनुभूयते = अनुभव करते हैं। येषाम् = जिनका। संवत्सरे = वर्ष में। अत्र = यहां। यत्र = जहां। विद्यन्ते = विद्यमान हैं। आपणाः = दुकानें। वर्धयन्ति = बढ़ाते हैं। आयोज्यते = आयोजित होता है। रायपुरवासिनः = रायपुर में रहने वाले लोग। सौहार्द्रभावेन = मित्रभाव से। समायोज्यन्ते = सञ्चालित होते हैं। हट्टम् = बाजार। बालकानाम् = बालकों का। आबालवृद्धाः = बालक से वृद्ध तक। आगच्छन्ति = आते हैं। अष्टादशाधिकाः = अट्ठारह से भी अधिक।

## अभ्यासः

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए –**

(क) दूधाधारी मठस्य निर्माणं कदा सञ्जातम् ?
(ख) नगरस्य महत्वपूर्णहट्टस्य नाम किम् अस्ति ?
(ग) नगरे कति विश्वविद्यालयाः सन्ति ?
(घ) रायपुर नगरं कस्याः नद्याः तीरे स्थितम् ?

**प्रश्न 2. सही जोड़ी बनाइये –**

| | | | |
|---|---|---|---|
| (क) | दूधाधारीमन्दिरम् | – | मनोरञ्जनाय |
| (ख) | खारुननदी | – | टाउन हॉल |
| (ग) | शताधिकवर्षम् | – | रायपुरम् |
| (घ) | नन्दनकाननम् | – | १६२० संवत्सरे |

PTDKHH

**प्रश्न 3. 'उत्सव' शब्द के रूप प्रथमा, तृतीया और सप्तमी विभक्ति में लिखिए।**

❖❖❖